Lokadarpana
Vol. VI, No. 1, 99-108, April, 2026
Pandit Shree Lokanath Luitel Smriti Pratishthan, Dharan

# न्यायमतेन ईश्वरपर्यालोचनम्

**लक्ष्मण आचार्यः***

laxmanac.42@gmail.com

Received Date: February 15, 2026 - Accepted Date: March 28, 2026

**लेखसारः**

आलेखेऽस्मिन् न्यायमतानुसारमीश्वरपदार्थस्य चिन्तनं विहितमस्ति। प्रमाणप्रमेयादिपदार्थनिरूपणे तद्विश्लेषणे चाग्रेभूतं न्यायदर्शनमीश्वरपदार्थविषये तस्य सिद्धिस्वरूपादिकञ्चादाय न्यायसूत्रे गौतममहर्षिणा प्रतिपादितमथ च तद्व्याख्यानभूतेषु भाष्यवार्तिकन्यायमञ्जर्यादिग्रन्थेषु प्रतिपादितमीश्वरविषयकं न्यायमतमत्र विशेषेणाध्ययनं विधाय दर्शनेनानेन ईश्वरविषये कृतस्य चिन्तनस्य पर्यालोचनात्मकमध्ययनमत्र कृतमस्ति। ईश्वरः तत्स्वरूपं च वस्तुतः शब्दप्रमाणैकगम्यो नानुमानप्रमाणगम्य इति यद्वैदिकानां मतुमुच्यते तत्रानुप्रमाणेन ईश्वरं साधयतां न्यायाचार्याणां हृद्गताशयश्च कः? इति प्रश्नस्योत्तरमप्यत्र प्रकटीकृतं वर्तते। गुणात्मकशैल्यां प्रतिपादितेऽस्मिन् पर्यालोचनात्मकानुसन्धानालेखे प्रचलितया आधुनिकएपीएपद्धतेरुपयोगः कृतो विद्यते।

**शब्दकुञ्जी :** न्यायः, ईश्वरः, पर्यालोचनम्,अनुमानम्, दर्शनम्, कर्तृत्वम्, सामञ्जस्यम्, सिद्धान्तः।

**विषयपरिचयः**

प्रमेयप्रधानभूतं वैशेषिकदर्शनं प्रमाणप्रधानभूतं च न्यायदर्शनमेतदुभयमपि समानतन्त्रमुच्यते। समानतन्त्रत्वादेवोभयोः शास्त्रयोरैक्यमिति न्यायवैशेषिकदर्शनमित्येवंरूपेण एकवचनान्तप्रयोगेण व्यवहार उत्तरकाले बहुभिः विद्वद्भिः कृत उपलभ्यते इति तत्र शास्त्रज्ञा अभिजानन्त्येव। प्रमाणप्रमेयादिपदार्थानां स्वरूपनिरूपणादिविषये प्रायो मतैक्यमनयोरतो यन्न्यायमतं यच्च वैशेषिकमतमुभयमप्युभ्याभ्यां परस्परं स्वीकार्यमस्ति कतिपयविषयान् परित्यज्य। प्रकृते च ईश्वरविषयेऽपि प्रायो न्यायवैशेषिकमतयोः समाना

* उपप्राध्यापक, वाल्मीकिविद्यापीठम्

दृष्टिः। यद्यपि कणादप्रणीतं वैशेषिकसूत्रमीश्वरमधिकृत्य महर्षिगौतमप्रणीतं न्यायसूत्रमिव स्पष्टं न वक्ति, अत एव अनीश्वरवादि तद्दर्शनमिति केचन तथाभिप्रयन्ति परन्तु प्रशस्तपादभाष्यकारप्रभृतिभिः तद्व्याख्याकारैरीश्वरविषये स्पष्टतयोल्लेखनाद् वैशेषिकदर्शनमपि ईश्वरवादि एव।

न्यायसूत्रे च महर्षिगौतमेन स्पष्टत ईश्वरस्य नामग्रहणादस्येश्वरवादित्वे नास्ति विप्रतिपत्तिः। विप्रतिपत्तिरस्ति चेत् तस्य सिद्धिविषये तत्स्वरूपादिविषये च केवलम्। सूत्रे तु तत्स्वरूपं नैव प्रतिपादितं दृश्यते। तस्य साधनमपि अनुमानप्रमाणेनैव क्रियते। परमुत्तरकाले तद्व्याख्यातार ईश्वरमधिकृत्य तत्सिद्धिविषये तस्य स्वरूपविषये चाधिकं किंचिद्विस्तरेण उक्तवन्तो दृश्यन्ते इति वेदप्रामाण्यवादिनानेन दर्शनेनापि ईश्वरमधिकृत्य कुत्र कुत्र किं किमुक्तमस्तीति तद्विषये अत्र किञ्चिद् पर्यालोच्यते।

किञ्च अत्र ईश्वरः वस्तुतोऽअनुमानप्रमाणेन साधयितुं न शक्यते इति मीमांसकानां(पूर्वोत्तरमीमांसकानाम्)मतमस्ति, एवंचेद् वेदप्रामाण्यवादिभिः नैयायिकैस्तर्हि तद्विषये किं स्पष्टीकरणं दीयते ? अथवा अनुमानप्रमाणेन ईश्वरसाधने प्रवृत्तानां नैयायिकानां हार्दाशयश्च कः स्यादित्यादिकं चात्र पर्यालोचनीयमस्तीति तद्विषये चिन्तनायायमुप्रकमो विधीयमानो वर्तते। न्यायदर्शने ईश्वरस्वरूपमधिकृत्य बहुभिः न्यायदर्शनविद्भिः स्वलेखनीचालनेपि शब्दप्रमाणैकगम्य ईश्वर इति यद्वैदिकं मतं वर्तते तेन सह नैयायिकानामीश्वरविषयकचिन्तनस्य कथं सामञ्जस्यं प्रतिपादयितुं शक्यते ? सन्दर्भेऽस्मिन् नैयायिकानां हार्दाशयश्च कः स्यात् ? यतो हि एतेऽपि वैदिका एव। वेदं प्रमाणत्वेन एतेऽप्यंगीकुर्वन्त्येव। किं बहुना वेदप्रामाण्यसंरक्षणे महती भूमिका न्यायदर्शनस्यैवास्तीति जयन्तभट्टीयकथनानुसारं वेदप्रामाण्यसंस्थापनव्रतैकस्यास्य ईश्वरविषये श्रुतिप्रमाणमतिरिच्यानुमानप्रमाणे निर्भरत्वप्रदर्शनस्य क आशयः स्यादित्यादिकमादाय एवंविधपर्यालोचनात्मकाध्ययनस्यादर्शनाद् नूनं नूतनमिदमध्ययनं भविष्यतीति तदर्थमुपक्रमो मम सफलतामेष्यतीति विश्वसीमि।

प्रकृतालेखे च समस्या एवंभूता अस्ति–न्यायदर्शनाभिमतमीश्वरस्वरूपं कीदृशम् ? इति। अतः प्रकृतमध्ययनमपि न्यायदर्शनाभिमतमीश्वरस्वरूपप्रतिपादने केन्द्रितमस्ति ।

अध्ययनस्यास्य विशुद्धशास्त्रीयरूपत्वात् प्रकृतविषयस्य वैदिकदर्शनमधिकृत्य व्याख्येयत्वाच्च वैदिकदर्शनसम्बद्धग्रन्थाः तत्सम्बद्धालेखाश्च क्षेत्रत्वेन सीमात्वेन च निर्धारिताः सन्ति। दर्शनानां मुख्यं प्रयोजनं तत्त्वाधिगतिः। तत्त्वं च विषयाणामध्ययनेनैव प्रकटितं भवतीति प्रकृते ईश्वरपदार्थमधिकृत्य तस्य स्वरूपादिकं चाधिकृत्य विषयस्यास्य चिन्तनीयत्वेन न्यायदर्शनसम्मतेश्वरवादमादाय वैदिकमतस्य समन्वयप्रदर्शनीयत्वेन च तत्र न्यायमतेनेश्वरस्य पर्यालोचनीयत्वात् तत्र समुत्थितविविधसन्देहानां निराकरणेन सुतरामध्ययनस्यास्यौचित्यं स्फुटमवगतं भवति।

## अध्ययनविधिः

आलेखेऽस्मिन् स्वीकृतोऽध्ययनविधिर्गुणात्मकानुसन्धापद्धत्यामाधारितो वर्तते। अत्र पुस्तकालयीयसामग्रीणां प्रयोगो विद्यते। वर्णनात्मकविश्लेषणात्मकविध्योरेतादृशालेखेऽवश्वंभावित्वेन तयोर्विध्योर्नितरामत्रोपयोगो विहितोऽस्ति।

## सैद्धान्तिकपर्याधारः

विषयोऽयं विशुद्धः शास्त्रीयो वर्तते अत एतद्विषयसम्बद्धानां ग्रन्थानां पत्रपत्रिकाणामेवात्राधारत्वेन वर्तमानत्वादेतद्विषयसम्बद्धा ग्रन्थाः पत्रपत्रिकाणि च लेखस्यास्य पर्यालोचनेआधारभूतानि भवन्ति।

**न्यायमतेन ईश्वरवादः, तत्पर्यालोचनञ्च**

नैयायिकास्तावदीश्वरमनुमानप्रमाणेन साधयन्ति। ईश्वरविषये न्यायसूत्रे महर्षिणा त्रीणि सूत्राणि विरचितान्युपलभ्यन्ते ''ईश्वरः कारणं पुरूषकर्माफल्यदर्शनात्'' (गौतमः, न्या.सू. ४/१/१९) ''न पुरूषकर्माभावे फलानिष्पत्तेः'' (गौतमः, न्या.सू. ४/१/२०) ''तत्कारित्वादहेतुः'' (गौतमः, न्या.सू. ४/१/२१) इति।

तत्र प्रथमेण सूत्रेण पुरूषकर्मणां वैफल्यदर्शनादीश्वरोऽपि तावत् कारणं वक्तव्यं येन पुरूषस्य कर्मफलाराधनं पराधीनमस्ति, यदधीनमुक्तफलाराधनं स एवेश्वर इति प्रतिपाद्य द्वितीयेन सूत्रेणपुरूषकर्माभावे फलनिष्पत्तेरप्यभावाद् न फलमीश्वराधीनमिति आशङ्क्य तृतीयेन च सूत्रेण पुरूषकर्मसापेक्षस्य ईश्वरस्य कारणत्वं प्रतिपादितम्। इदं प्रकरणमादायैव न्यायभाष्यकारवात्स्यायनप्रभृतय आचार्या ईश्वरस्यानुमानप्रमाणेन साधनमभिप्रयन्ति। पश्चाच्च बहुभिराचार्यैरीश्वरसिद्धिविषयेऽनुमानप्रमाणस्य प्रदर्शनेन नैयायिकास्तावदनुमानेनैव ईश्वरं साधयन्तीति सिद्धान्त्यते। तत्राचार्योदयेन च न्यायकुसुमाञ्जलौ पञ्चमस्तबके विविधहेतुभिरीश्वरसाधनात्, प्रथमस्तबकस्य प्रथमे घट्टे एव ईश्वरविषये विविधदार्शनिकानां मतानि सन्दर्श्य येन केन रूपेण चार्वाकवराकोऽपि ईश्वरमङ्गीकरोत्येव नास्ति तद्विषये कस्मैचिदपि संशय इत्यादिकं वदन् तत्रैव ''यावदुक्तोक्तोपपन्न इति नैयायिकाः'' (२०१३ : पृ.२) इत्यादिना न्यायमतस्य प्रदर्शनेन ईश्वरोऽनुमानप्रमाणगम्यमवश्यमभ्युपेयं भवतीत्यादिकं न्यायशास्त्रमतं तत्र प्रकटितमनुभूयते।

यद्यपि ईश्वरो य ादृशो यद्गुणकश्च तादृषास्तु वेदप्रमाणेनैव सिद्ध्यति, शास्त्रयोनित्वात्तस्य, तथापि वेदस्य वेदबाह्यैः परैः प्रामाण्यानभ्युपगमात्, किं वा ईश्वरोच्चरितत्वेनैव वेदस्य प्रामाण्यमिति नैयायिकैरङ्गीकाराद् स चेश्वरः पुनः वेदप्रमाणैकगम्य इति प्रतिपादने अन्योन्याश्रयात् अनुमानप्रमाणेन ईश्वरसाधनाय नैयायिकानामयं यत्नो भाति। ईश्वरोऽनुमानप्रमाणेनैव सिद्धयति, साधनीयो वेति न नैयायिकानामपि निर्बन्धः, आगमप्रमाणस्य तैरप्यङ्गीकारात्। वेदः स्मृतिः पुराणानि चेश्वरसद्भावं तस्य जगत्कर्तृत्वं च प्रतिपादयन्ति तत्र तत्र। परन्तु प्रथमं तावद् यस्य कस्यापि वस्तुन सद्भाववर्णने प्रत्यक्षं प्रमाणं भवतीति ईश्वरविषये प्रत्यक्षस्याप्रसरात् शब्दप्रमाणाख्यवेदस्य परैः चार्वाकबौद्धजैनादिप्रभृतिभिः प्रामाण्यानङ्गीकारात्, अनुमानप्रमाणेनापि सर्वज्ञ ईश्वरः साधयितुं शक्यते इति धियाऽनुमानप्रयोग उच्यते परेभ्यो नैयायिकैरिति विभावयामः।

अत एव अयमहमस्मीति स्वविषयकानुभवस्य सत्वेन स्वात्मनः प्रत्यक्षसिद्धस्यापि वस्तुत इदानीन्तनपण्डितानां कृते देहात्मैक्यभ्रमात् शरीरातिरिक्तात्मज्ञानमप्यनुमितिरूपं शाब्दरूपं वा वक्तव्यम्, न प्रत्यक्षरूपम्। स्वस्वरूपज्ञानस्यैव एवंविधत्वे ईश्वरसिद्धिस्तावत् सुतरामनुमानेनैव वक्तव्येति हार्दाशयो नैयायिकानामति पण्डितरत्नम् के.एस. वरदाचार्या वदन्ति तर्कङ्ग्रहस्यालोकव्याख्यायाटिप्पण्याम् (सन्. २००७ : पृ.७१)। अन्यदप्येकं रहस्यं ते प्रकटयन्ति यद् वस्तुतोऽयं विषयो न्यायशास्त्रसीमातीतः। अत

एव प्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षोत्पन्नेति सूत्रे महर्षिणा ईश्वरीयप्रत्यक्षस्यालक्ष्यत्वं तत्राभिप्रेतमिति। अथापीश्वरनिराकरणतत्पराणां चार्वाकादिप्रभृतीनां मुखपिधानं वैदिकैः कर्तुमशक्यमभूदिति स भारः तार्किकाणामुपरि आपतित इति। यथोक्तम्–

''यद्यप्येवं विषयो न्यायशास्त्रससीमातीत एव। अत एव न्यायसूत्रेषु भाष्ये वा नेश्वरसाधनं दृश्यते। इन्द्रियार्थसन्निकर्षोत्पन्न..... प्रत्यक्षमित्यादिसूत्रेणैवेदं स्पष्टीकृतम्, ईश्वरीयप्रत्यक्षस्यालक्ष्यत्वा भिप्रायात्। तथापीश्वरनिराकरणव्यग्राणां मुखपिधानस्य वेदैकशरणैः वेदान्तिभिः कर्तुमशक्यत्वात् स भारः तार्किकाणामुपरि अवशात् पतितः। तद्भारं स्वीकुर्वद्भिः न्यायाचार्यैरुदयनैः तदर्थमेव व्यरचि न्यायकुसुमाञ्जलिनामकः प्रौढो ग्रन्थः। तदनुसारेणेश्वरानुमानं संग्रहेण प्रदर्श्यते...''(वरदः, सन्. २००७ : पृ.७१) इति।

अत्र नैयायिकाचार्यैरीश्वरस्य साधनाय प्रयुक्तस्यानुमानस्य तथाविधतात्पर्यत्वेऽपि किं वस्तुतः ईश्वरोऽनुमानप्रमाणेन साधयितुं शक्यम् ? शक्यम्, उक्तं किल! पूर्वम्। अत एव आचार्योदयनो विशेषेण ईश्वरसाधनायैव महान्तं प्रौढग्रन्थं न्यायकुसुमाञ्जल्याख्यं व्यरचयत्। एवं सत्यपि उत्तरकालिका अत्र कतिपयवैदिकाचार्या एवेश्वरस्य साधनं वस्तुतोऽनुमानप्रमाणेन साधयितुं न शक्यते इति ब्रुबन्तो दृश्यन्ते। यथा तत्त्वमुक्ताकलापे वेंकटेशाचार्यः वैदिकमतेन ईश्वरानुमानं परीक्ष्य दूषयति। तथा हि–

**सर्गादीनामसिद्धौ न हि निगमगिरां भज्यते सम्प्रदायः,**
**तत्सिद्धौ नानुमानं प्रभवति यदिदं बाधशून्ये विपक्षे।**
**शास्त्रेभ्यस्तत्प्रसिद्धौ सहपरिपठनात् विश्वकर्तापि सिद्ध्येत्,**
**धर्मानुष्ठानार्थं तदनुमितिरतो नैव शक्या कदाचित् ॥**

(नायकसरः, श्लो.१५)

तत्र तेन कार्यत्वहेतुनेश्वरसाधकमनुमानमपि दूषितमस्तिसोपाधिकत्वाप्रयोजकत्वादिप्रदर्शनेन।यथा— ''साध्यं तादृग् सपक्षे नियतमवगतं स्याद्धि पक्षेऽपि तादृक्...''(नायकसरः, श्लो.१६) ''कार्यं स्यात् कत्रृभावेऽप्यवधिभिरितरैः कालवत् स ह्यसिद्धः...'' (नायकसरः, श्लो.२१) ''धर्मो यावत्सपक्षानुगत उपधिरित्यभ्युमेतस्त्वयाऽपि....''(नायकसरः, श्लो.२२) इत्यादिभिः। अनुमानेन कथंचित् सिद्धश्चेदपि तादृशः पदार्थो जीवविलक्षणो न सिद्ध्यति, अनुमानेनेश्वरस्य सर्वज्ञत्वं साधयितुं न शक्यते इत्येवमीश्वरानुमानदूषकानां वैदिकानां तात्पर्यं पश्यामः। एवं सति एकं वैदिकदर्शनमीश्वरमनुमानप्रमाणेन साधयितुं चेष्टते चेदपरो वैदिकस्तेन प्रमाणेन न शक्यते इति वदति चेदुभाभ्यामपि वैदिकत्वेन/ वेदप्रामाण्यवादित्वेन किं प्रामाणिकमंगीकार्यमिति भवत्यध्येतृणां शिरोवेदना। एतादृशाशंकाया निवारणमेव वस्तुत एतदध्ययनस्य कार्यमस्ति।

अत्रैतेषां वैदिकाचार्याणामपीश्वरविषये न्यायमतोक्तानुमानदूषणस्य तात्पर्यं वस्तुतोऽन्यदेवास्तीति विभाव्यते। अत्र वैदिका वेदस्यैव परमप्रमाणभूतत्वाद् वेद एवेश्वरे प्रमाणं वक्तव्यमित्यभिप्रायेण सर्वथातीन्द्रियविषये तत्रापि ईश्वरसदृशात्यन्तविलक्षणवस्तुनि यच्च सर्वथा श्रुतिप्रमाणमतिरिच्यान्येन

तत्स्वरूपादिकं याथार्थेन किमपि चिन्तनं कर्तुमेव न शक्यते तत्तादृशविषये किं तत्साधकं भवेत् क्षुद्रतरानुमानप्रमाणम् ? इत्यतः तथाभूतेश्वरसाधनेऽसमर्थ्यभूतमनुमानप्रमाणमपि समर्थप्रमाणरूपेण ये मन्वते न्यायाचार्याः तत्सर्वथान्याय्यमिति तेषामभिप्रायः स्यात्। तदभिप्रायेणैव ईश्वरसाधकानामनुमानानां निराशो विशुद्धवैदिकपरिपन्थिभिः कृत इति विज्ञायते। न केवलं वेंकटेशोऽन्ये च वैदिकाचार्या एतत्सन्दर्भे एवमेव बुरवन्ति। अत एव न्यायसूत्रकारो महर्षिगौतमो कणादमहर्षिर्वा न कुत्रचिद् व्यग्रचित्तौ दृश्येते ईश्वरसाधने इत्यनुभवोऽपि। परमुत्तरकाले ईश्वरसाधकतयाऽनुमानप्रामाणं दृढीकुर्वन्तो बहवो न्यायाचार्या अनुमानशास्त्रत्वेनैव न्यायशास्त्रं परिचाचयन्तोऽनुमानप्रामणस्य सामर्थ्यं तावत्पर्यन्तं वर्तते इति प्रदर्शयितुकामा अभवन्निति तन्न शोभनमिति मत्वैव मन्ये ईश्वरसाधकानुमानस्य वेदान्तिभिः दूषणमिति विषयवस्तुपरिशीलनेन ज्ञायतेऽथापिपरम्पराप्राप्तस्य वैदिकमतस्य संरक्षणोद्देश्येन शिष्याणां बुद्धिवैशद्यार्थं च विविधप्रकारेण तद्विषयकानुमानप्रमाणस्य चिन्तनं विशुद्धवैदिकं स्वात्मानं मन्यमाना आचार्या अकुर्वन्निति परिशील्यते।

ईश्वरसन्दर्भमादाय यदा जैनबौद्धादिवादाः प्रबला अभवन् तदा तेषां निराकरणे वेदान्तिभिः मौनमाश्रितेषु सत्सु नैयायिकैराचार्यैरेव तेभ्यः समुचितमुत्तरं स्वीययुक्तिभिः प्रदत्तमितीश्वरानुमानसन्दर्शनमपि उदयनाचार्यप्रभृतीना तत्कारणप्रयुक्तमेव। तथा चेश्वरविषये तादृशसाहसिककार्यस्य करणान्नैयायिको क्तानुमानप्रमाणस्य निराकरणे वेदान्तिभिरपि तादृशव्यग्रचित्तेन नैव भाव्यमित्युभयपक्षत इदं निष्कृष्यते यत्– ईश्वरानुमानसन्दर्भे वैदिकैः परस्परं केशाकेशीकरणमनुपयुक्तमेव। विशुद्धैर्वैदिकैरीश्वरसाधनसन् दर्भे तन्मतखण्डने आचार्योदयनस्यैव खण्डनं कृतमिव भवतीति येन वेदप्रमाणं वेदबाह्येभ्यः परिरक्षितं तस्यावहेलनं तदपराधं वा कृतं भवतीति मत्वा विरमणीयम्। उदयनोऽपि महावेदान्ती आचार्यः। अत एव कुसुमांजलौ प्रारम्भे एव न्यायचर्चेयमीशस्य मननव्यपदेशभाग् उपासनैव क्रियते श्रवणानन्तरागतेति वदन् न्यायचर्चायाः तात्पर्यं संसूचयति सूक्ष्मरीत्या। अत ईश्वरानुमानसन्दर्भमादाय वैदिकैः केशाकेशी नैव कार्या। ईश्वरानुमानप्रदर्शनस्य तात्पर्यं परिज्ञाय विरमन्तुमेवोचितम्। सन्दर्भेऽस्मिन् श्रीमन्तो के एस् वरचार्याः अस्मदाचार्याः तत्त्वमुक्ताकलापाख्यग्रन्थस्य सर्वांकषाख्यटीकायां तत्र तत्र बहुसम्यक् परिशीलितवन्तः सन्तीति तत इतोऽपि विशेषपरिज्ञानं कर्तुं शक्यते इति च निवेद्यते।

ईश्वरानुमानसन्दर्भे उदयनादतिरिच्य जयन्तभट्टश्च विशेषं वक्तीति तदीयन्यायमंजरीग्रन्थानुसारं न्यायमतेनईश्वरस्वरुपमिदानीं प्रदर्श्यते–

जयन्तभट्टश्च ईश्वरस्य सिद्धिः सामान्यतोदृष्टेन लिङ्गेन कर्तुं शक्यते इत्यभिप्रेत्य लिखति न्यायमञ्जर्याम् ''सामान्यतोदृष्टस्तु लिङ्गमीश्वरसत्तायामिदं बूरमहे। पृथिव्यादि कार्यं धर्मि, तदुत्पत्तिप्रकारप्रयोजनाद्यभिज् ञकर्तृपूर्वकमिति साध्यो धर्मः, कार्यत्वाद् घटादिवत्'' (सन्. १९८२ : पृ.२७२) इति। कार्यत्वहेतुना ईश्वरे जगत्कर्तृत्वसिद्धौ तस्य सर्वज्ञत्वमपि अर्थाद् सिद्ध्यति। यतः कर्तृत्वं हि तदुपादानगोचरापरोक्षज्ञानचिकी र्षाकृतिमत्वम्। एतादृशजगत्कर्तृत्वं ईश्वरे तस्य सर्वज्ञत्वं विना न सम्भवतीति पारिशेष्याद् तदपि सिद्धं भवति। ईश्वरस्य सर्वज्ञत्वमागमादपि प्रतिपद्यते इति आगमोऽपि तत्र प्रमाणम्। अतो जयन्तोलिखति ''कर्तृत्वसामान्यसिद्धौ वा विशेषावगतिः कुतः ? इति तत्र केचिदागमाद् विशेषप्रतिपत्तिमाहुः (सन्.

१९८२ : पृ.२७९) इति। तत्रागमं च *विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुभ्यां धमति संपतत्रैद्र्यावाभूमी जनयन् देव एक* इत्यादिकं प्रदर्श्य अनेन केचिदित्यनेन ईश्वरस्य सर्वज्ञत्वसिद्धौ आगमे नैर्भर्यं ये व्यक्तीकुर्वन्ति तत्रारूचिः प्रदर्शिता जयन्तभट्टेनेति ज्ञायते। यतो नैयायिका जगत्कर्तृत्वेनेश्वरसिद्धौ तस्मिन् सर्वज्ञत्वमर्थतः सिद्धं भवतीत्यभिप्रयन्ति। अतः पारिशेष्यात् स च कर्ता जीवविलक्षणः सिद्ध्यतीति कर्तृत्वस्य चोपादानगोचरज्ञानचिकीर्षाकृतिमत्वरूपत्वेन कार्यत्वादिहेतुना सिद्ध्यन्ति तस्मिन् सर्वज्ञत्वमपि सिद्धं भवतीति। अत एव नैयायिका अनुमानबलेनैव ईश्वरं तस्य सर्वज्ञत्वं च साधयितुं शक्यते इति वदन्ति। इदं चागमैकशरणत्वनिराकुर्वतो जयन्तभट्टस्य ''आगमैकशरणत्वाभावादीश्वरसिद्धेः'' (सन्. १९८२ : पृ.२८०) इति वचनेन स्पष्टीभवति।

**ईश्वरज्ञानादीनां नित्यत्वम्**

अनुमानप्रमाणेन सिद्धस्येश्वरस्य ज्ञानं नित्यं कथं सिद्ध्यतीति चेत् ?अत्र न्यायमतानुरोधेनोच्यते— जगत्कर्तृत्वने अथ च सकलजीवानां कर्माधिष्ठातृत्वेन च सिद्धस्य तस्येश्वरस्य क्षणमपि अज्ञानवत्वे प्रतिक्षणं ज्ञानस्य भिन्नत्वे च तदिच्छया पे्रर्यमाणनानाकर्माधीनव्यवहाराणां विराम आपद्येत।

ननु ! महाप्रलये सर्वविधव्यवहाराणां विरामस्य सत्वेन तस्यानित्यत्वकल्पनेऽपि न हानिरिति चेत् ? आप्रलयं तस्य नित्यत्वमवश्यस्वीकर्तव्ये तदापि तद्विनाशकाभावात् आत्मन इव तज्ज्ञानस्यापि नित्यत्वमेव सिद्धं भवति। तदीयं ज्ञानं च सर्वविषयकमेकमेवेति इदं च न्यायपन्थानं भट्टजयन्तो न्यायमंजर्यां सम्यक्तयोट्टंकितवान्। यथाह–

''नित्यं तज्ज्ञानं कथमिति चेत्, तस्मिन् क्षणमपि अज्ञातरि सति तदिच्छाप्रेर्यमाणकर्माधीननानाप्रकारकव्यवहारविरामप्रसङ्गात्...। आप्रलयात् सिद्धे नित्यत्वे तदा विनाशकारणाभावादपि नित्यत्वम् तज्ज्ञानानाम्'' (सन्. १९८२ : पृ.२८२) इत्यादिकम् ।

न्यायमुक्तावल्या दिनकरीव्याख्यायामीश्वरसाधनानुमानप्रसङ्गे दिनकरीकारश्च न्यायमतं प्रतिपादयन् लिखितवान् ''एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषु नित्यत्वमेकत्वं च भासते इति नित्यैकत्वसिद्धिः'' (महादेवः, सन्. २००२ : पृ.३०) इति। ईश्वरीयं ज्ञानं यथा नित्यं तद्वदन्ये इच्छादयस्तदीया गुणा अपि नित्याः, मनस्संयोगानपेक्षजन्मत्वात्। दुःखद्वेषादयो गुणाः तस्मिन् नेष्यन्ते। भावनाख्यसंस्कारोऽपि नेष्यते, तस्य सर्वदा सर्वार्थदर्शित्वेन कदापि स्मरणाभावात्। अत एवेश्वरस्य ज्ञानमानुमानिकं भवतीति च नेष्यते। धर्मोपि तस्मिन् नेष्यते। परन्तु जयन्तभट्टस्तु एवं वदति– धर्मस्तु भूतानुग्रहवतो वस्तुस्वाभाव्याद् भवन् न वार्यते। तस्य च फलं परामार्थनिश्पत्तिरेव'' (सन्. १९८२ : पृ.२८३) इति। तदीयं तात्पर्यमेवमस्ति यत् धर्मः तस्मिन् इष्टोऽपि जीवेष्विव कर्मजन्यो नेष्यते, यश्च सुखहेतुस्तत्रोरीक्रियते। परमात्मनि सुखमस्ति तच्च नित्यम्, तस्य च न धर्मजन्यत्वमिति जीववृत्तिसुखेन सहास्य सुखस्य वैलक्ष्यण्यम्। परमात्मनि सुखस्य सद्भावासद्भावविषये प्रायो न्यायाचार्याः तत्र दुःखमिव सुखमपि नास्तीत्येवं बुरवन्ति। अत एव महेश्वरे अष्टौ गुणा इत्यभिप्रेत्य कारिकावल्यां विश्वनाथपञ्चानन आह– ''संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे''(कारिका–३४) इति। तस्यैव व्याख्यायां दिनकरीकारः सर्वं संगृह्य कुत्र कति गुणा

नैयायिकैरङ्गीक्रियते इति च *वायौर्नवैका दश तेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश। दिग्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च* इत्यादिना स्पष्टीकृतवान्निति पश्यामः। परन्तु जरन्नैयायिको भट्टजयन्तोऽस्मिन् विषये किञ्चिद् न्यायमतं परिशोधयन् ईश्वरेऽपि सुखस्यास्तित्वमङ्गीकृतवान् आसीत् तदात्वे, तच्च जीवगतसुखवैलक्ष्यण्यप्रतिपादनमुखेन, अतो जयन्तभट्टमते ईश्वरे नव गुणाः सन्ति। यथाह ''तदेवं नवभ्य आत्मगुणेभ्यः पञ्च ज्ञानसुखेच्छाप्रयत्नधर्माः सन्तीश्वरे'' (सन्. १९८२ : पृ.२८३) इति। तत्र कारणन्तु ईश्वरस्य नित्यानन्दवत्वस्यागमेन प्रतिपादनात्। ''आनन्दं ब्रह्मेति व्यजानात्, अस्यैवानन्दस्य मात्रामुपजीवन्ति। यद्यात्मा आनन्दो न स्यात्'' इत्यादिश्रुतेः। अयं चानन्दः सुखात्मको गुणविशेष ईश्वरनिष्ठः।

किञ्च भूतानुग्रहवशादेव जगत्सर्जनात् परमेश्वरेणासुखित्वे तस्य चैवंविधकार्यारम्भयोग्यत्वाभावादित् यपि। ज्ञानानन्दाविव इच्छापि परमात्मनो नित्या। न चेच्छाया नित्यत्वे सर्वदा जगदुत्पत्तिरिति जगदानन्त्य-प्रसङ्गः ? एवं संहारेच्छाया अपि नित्यत्वे सदा सर्गप्रलयप्रसङ्ग इति वाच्यम् ? तत्रोच्यते– स्वरूपेण तदिच्छाया नित्यत्वस्वीकारेण कदाचित् सर्गेण कदाचित् संहारविषयेणानुरञ्जनसम्भवात्। प्रयत्नोऽपि तस्य नित्य एवानित्यत्वे मानाभावात्। स च संकल्पविशेषः, *सत्यकामः सत्यसंकल्प* इति श्रुतेः (छान्दोग्य.८.७.१)। अत्र कामपदेनेच्छोक्ता चेत् संकल्पपदेन प्रयत्नविशेषः। तत्र सत्येति विशेषणाद् इच्छाप्रयत्नयोरपि ज्ञानवत् नित्यत्वमेव। अनित्यत्वे प्रमाणाभावस्य पूर्वमुक्तत्वात्। एवं चेश्वरं साधयदनुमानप्रमाणं तस्य सर्वज्ञत्वं तज्ज्ञानस्य नित्यत्वमिच्छाप्रयत्नयोश्च नित्यत्वमित्यादिकं सर्वं बलाद् साधयति। अत एव ईश्वरसाधकानि बहूनि लिङ्गानि न्यायकुसुमाञ्जलौ आचार्योदयेन उपन्यस्तानि अवलोकयामः। जयन्तभट्टश्च न्यायमञ्जर्यामिदं सर्वं निरूपयति तृतीयाह्निके ईश्वरनिरूपणावसरे (सन्. १९८२ : पृ.२८३)।

## ईश्वरस्य सृष्टिप्रलयकर्तृस्वभावत्वम्

गौतममहर्षिणाईश्वरमभिकृत्य त्रीणि सूत्राणि विरचितानि सन्तीति पूर्वमुक्तम्। तत्र तेन जीवकर्माधिष्ठातृत्वेन तत्फलप्रदातृतया ईश्वरः साधनीयो भवतीति प्रतिपादितम्। ईश्वरस्य सृष्टिप्रलयकर्तृत्वेन निरूपणं साक्षाद् सूत्रेषु कृतं न प्राप्यते अथापि पश्चभाविन उदयनप्रभृतयो न्यायाचार्या ईश्वरस्य सृष्टिप्रलयकर्तृत्वविषये बहु अवदन्। गौतममहर्षिणापि जीवफलदातृत्वेन ईश्वरसद्भावस्यावश्यं स्वीकर्तव्यत्वोक्तत्वाद् जीवेभ्यः फलभोगप्रदानमीश्वरेणैव क्रियते इति अनेन जगतः सृष्टिरपि जीवानां भोगायैवास्तीति ईश्वरकृतमेव तदिति स्वतः सिद्धं भवति। किमपि कार्यं सप्रयोजनं भवतीति सृष्टिरपि सप्रयोजना नूनं वक्तव्या। तत्प्रयोजनं चानन्तजीवानां विषयभोग एव। अत एव मुक्तावलीकारो लिखति– ''न हि बीजप्रयोजनाभ्यां कस्यचिदुत्पत्तिरस्ति'' (विश्वनाथः, २०५२ : पृ.१२६) इति। न्यायमञ्जरीकारोऽपि— ईश्वरो जगत्सृजति केन प्रयोजनेनेति चेद् नहि तस्मै स्वस्मै किमपि प्रयोजनमस्ति जगत्सर्जनस्य, अपितु जीवेभ्यः तत्तत्कर्मानुरूपं फलभोगार्थं जगत्सृजतीत्यादिना ईश्वरस्य जगत्सर्जनस्य प्रयोजनं निरूपयति न्यायमंजर्याम्। जगत्सर्जनं च तस्य स्वभाव इति। यथाह ''यस्तु प्रयोजनविकल्पः किमर्थं सृजति जगन्ति भगवान्निति? सोऽपि न पेशलः। स्वभाव एवैष भगवतो यत् कदाचित् सृजति कदाचिच्च. सहंरति विश्वमिति'' (जयन्तः, सन्. १९८२ : पृ.२८४)।

अथवा जीवानामुपरि अनुकम्पयैव सृष्टिसंहारादिकमीश्वरः करोतीत्यपि वक्तुं शक्यम्। सा चानुकम्पा फलप्रदानेन स्वानुभूत्या मोक्षपर्यन्तं जीवस्य मार्गप्राशस्त्यर्थमिति। जयन्त एनमपि पक्षमुट्टंकयति मंजर्याम् ''अथवा अनुकम्पयैव सर्गसंहारावारभतामीश्वरः....... सर्वमेत् कृपानिबन्धनमेव''(तत्रैव, पृ.२८४) इति। ईश्वरः समयविशेषे सर्जनेच्छया परमाणुषु जगत्सर्जनहेतुभूताः क्रियाः सम्पादयतीति ततः सर्गो जायते। यदा संहारेच्छा तदा जगत्संहारहेतुभूतां क्रियामुत्पादयति परमाणुष्विति जगत्संहारः। ईश्वरमधिकृत्य प्रकृतविषयमुपसंहरन् जयन्तभट्ट एवं च लिखति ''सिद्धः त्रैलोक्यनिर्माणनिपुणः परमेश्वरः'' इति। पुनश्च—

ये त्विश्वरं निरपवाददृढप्रमाणसिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः।
पापाय तैः सह कथापि वितन्यमाना जायेत नूनमिति युक्तिमतो विरन्तुम् ॥
यस्येच्छयैव भुवनानि समुद्भवन्ति तिष्ठन्ति यान्ति च पुनर्विलयं युगान्ते।
तस्मै समस्तफलभोगनिबन्धनाय नित्यप्रबुद्धमुदिताय नमः शिवाय ॥

(सन्. १९८२ : पृ.२८६)

**जगदद्वैचित्त्यं कर्माधीनं न तु ईश्वराधीनम्**

ईश्वर एव जगतः सृष्टिसंहारकर्ता, जीवानां तत्तत्कर्मानुरूपं फलप्रदाता चेति पूर्वमुक्ते अत्र शङ्क्यते यत् एवं तर्हि ईश्वरस्येच्छैव जगत्कत्री संहत्री अथ च फलप्रदात्री च भवतु, अलं जीवानां कर्मभिरिति। तत्रोच्यते– तथासति जगद्वैचित्र्यं फलभेदश्च न स्यादत ईश्वरेच्छायाः सर्वत्र नियमाकत्वेऽपि कर्मनैरपेक्ष्येण तस्या कारणत्वमुपापदयितुं न शक्यते, अन्यथा वैषम्यनैर्घण्यापेक्षपस्य निराकरणं कर्तुं न शक्यतेऽतो न्यायमते कर्माधीनमेव जगद्वैचित्र्यं नेश्वराधीनमिति। लिखति न्यायप्रवीणो जयन्तभट्टः ''कर्मभिर्विना जगद्वैचित्र्यानुपपत्तेः'' (सन्. १९८२ : पृ.२८६) इति। किञ्च कर्मनैरपेक्ष्यपक्षे त्रीन् दोषाञ्च प्रदर्शयति ''कर्मनैरपेक्ष्यपक्षेऽपि त्रयो दोषा दर्शिता एवेश्वरस्य निर्दयकर्मचोदनानर्थक्यानिर्मोक्षप्रसङ्गश्च'' (सन्. १९८३ : पृ.२८६) इत्यादिना।

**ईश्वरस्य शरीराभावः, परमाणूनामेव तच्छरीरत्वं वा**

ईश्वरस्य जगत्कतृत्वसंहर्तृत्वे साधितेऽयं प्रश्नो जागर्ति यद् यथा घटादिकार्यकर्ता जीवः सशरीरः सन्नेव कर्तुं समर्थो भवति तद्वत् ईश्वरोऽपि सशरीरः तत्सृजति उत अशरीरः ? इति। तत्रोच्यते– न्यायमते अनुमानप्रमाणेन जगतकर्तृत्वेन ईश्वरमात्रं सिद्धं भवतीति तस्य सशरीरत्व–अशरीरत्वयोः लाघवानुरोधेन कल्पनीयत्वात् अशरीर एव स जगत्सृजतीत्युच्यते। व्यापकस्य ईश्वरस्य शरीरसत्वे प्रमाणाभावात्। श्रुतिरपि तस्य शरीरं निषेधति–

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरूषं महान्तम् ॥

(श्वताश्वेतर., ३.१९)

जयन्तभट्टश्च लिखति न्यायमंजर्याम्– ''तत्राशरीरस्यैव स्रष्टृत्वमभ्युपगच्छामः'' (सन्. १९८२ : पृ.२८३) इति। न च सशरीरस्यैव कर्तृत्वं लोके दृष्टमिति ईश्वरेणापि सशरीरेण भाव्यमिति

वाच्यम् ? ज्ञानचिकीर्षाप्रयत्नयोगित्वरूपं कर्तृत्वं हि अशरीरेऽपि तस्मिन् सम्भवत्येवेत्युपगम्यते। स्वशरीरप्रेरणे चाशरीरस्यापि आत्मनः कर्तृत्वं दृष्टमेव।

अत्र वस्तुत ईश्वरस्यापि शरीरस्वीकारे तस्य नित्यत्वानित्यत्वयोर्विकल्पेन बहुविधसमस्याः समापतन्तीति ईश्वरस्य शरीरकल्पने क्लेश एव। अत एव वार्तिककारो लिखति ''तत्कारित्वादहेतुः'' (गौतमः, न्या.सू. ४/१/२१) इति सूत्रभाष्यव्याख्यायाम्– ''अथ नित्यान् शरीरादीन् कल्पयसि एवमपि दृष्टविपरीतं कल्पितं भवतीति''। एवं च शरीरस्वीकारे ईश्वरस्य सर्वदोषप्रसक्तौ ईश्वरत्वं भज्येतेति न्यायसिद्धान्तत्त्वामृतकारोऽपि वदति। अनुमानप्रमाणेन सिद्धस्येश्वरस्य शरीरमपि कल्पनीयमेवेति तु बाध्यता नास्ति। यतः यत्कर्तृत्वेन ईश्वरस्य सिद्धिर्भवति तादृशकर्तृत्वस्य लाघवात् कृतावेवांगीकारेण शरीरस्य कार्यं प्रति अकारणत्वेन तस्यान्यथासिद्धत्वादीश्वरोऽशरीर्येव। कुलालाद्यात्मवृत्तिकृतीनां घटादिकार्यं प्रति कारणत्वं च कुलालात्माधिष्ठानकशरीरं विनाऽसम्भवेऽपि ईश्वरस्य सर्वज्ञस्य सर्वसमर्थत्वाद् शरीरं विना तदुपपत्तेरीश्वरोऽशरीरी एव। अत एव लिखति न्यायसिद्धान्ततत्त्वामृतकारः 'कृत्यादिकं विना शरीरस्य जनकत्वाभावात् कृत्यादिकमेव सर्वत्र कारणम्। न तु शरीरमपि गौरवात्। तथा च तस्य क्वचिद् साक्षात्कारणत्वबाधेन शरीरद्वारा कल्प्यते। ईश्वरस्य तु शक्तत्वात् सर्वविषयकत्वाच्च स्वत एव जनकत्वसम्भवेन शरीरकल्पनमप्रामाणिकम् (श्रीनिवासः, सन्. १९५० : पृ.२९) इति।

किञ्च ईश्वरस्य जीवानामिव शरीरत्वे एव कर्तृत्वसम्भतीत्युच्यमानेऽपि परमाणव एव वा तस्य शरीरं भवत्विति वा न्यायपन्थाः। इदं चेश्वरेण जगत्सर्जने साक्षादीश्वराधिष्ठातृत्वं परमाणूनां भवतीत्यभिप्रायेण उदयनाचार्येण तथा प्रतिपादितम्। तथा ह्युक्तं कुसुमाञ्जलौ– ''साक्षादधिष्ठातरि साध्ये परमाण्वादीनां शरीरत्वप्रसंगः किमिदं शरीरत्वं यत् प्रसज्यते? यदि साक्षात् प्रयत्नवदधिष्ठितत्वम् तदिष्यते एवेति''। इदं च शरीरं न भोगायतनत्वलक्षणाक्रान्तम्। न वेष्टेन्द्रियाश्रयलक्षणाक्रान्तं च। ईश्वरस्य भोगाभावात्, इन्द्रियाभावाच्च। भोगो हि सुखदुःखसाक्षात्कारः, तच्चेश्वरस्य नास्त्येव।

आचार्योदयनमतानुयायिनः परमाणूनां ईश्वरशरीरत्वमंगीकुर्वन्तीति सन्दर्भे दिनकरीकार एवं लिखति ''आचार्यमतानुयायिनस्तु– अस्तु चेष्टात्वेन तत्र हेतुत्वम्, अस्तु च तदनुरोधेनेश्वरस्य नित्यं शरीरं तथापि नेश्वरस्यातिरिक्तशरीरसिद्धिः, परमाणूनामेव तच्छरीरत्वोपगमात्, न च परमाणूनां शरीरकल्पने गौरवात् लाघवेन तस्य अतिरिक्तत्वसिद्धिरिति वाच्यम् ?तच्छरीरस्य महत्त्वे अभुग्नस्य तस्य पाषाणादौ प्रवेशासम्भवेन पाषाणान्तर्वर्तिभेकशरीरोत्पादकतानुपपत्तेः। अणुत्वे च दूरस्थकार्यानुपपत्तेरित्यलं पल्लवैरिति (महादेवः, सन्. २००२ : पृ. ३७) इति।

## निष्कर्षः

आलेखेऽस्मिन् न्यायमते प्रतिपादितस्य ईश्वरस्य स्वरूपं कीदृशमस्तीति प्रतिपादितमस्ति। विशेषतो न्यायदर्शने ईश्वरविषये परिचर्चायाः सत्वेपि ईश्वरस्य शरीरेन्द्रियादिविषये एकत्रैव सामस्त्येन परिचर्चा कुत्रापि न प्राप्यते, अथ च वेदान्तिमतेन सह न्यायमतस्य ईश्वरानुमानसन्दर्भमादय यो विवादश्च वर्तते तस्यापि परितोऽध्ययनं विधाय तत्तात्पर्यं कुत्राप्येवंरीत्या प्रदर्शितं न भवतीति उभयपक्षमादाय

ईश्वरानुमानविषयकमिदं पर्यालोचनं नूनं नवीनं विचारमध्येतृभ्यः प्रदाने समर्थमस्तीति वैदिकाचार्यैः वृथा केशाकेशी न कर्तव्य ईश्वरानुमानसन्दर्भमादयेति अत्र निष्कर्ष आनीतोऽस्ति ।

## सन्दर्भसूची


आचार्यः, वरदः (सन् २००७). *तर्कसंग्रहालोकव्याख्या* (मूलयुता). मैसूर : आर्षग्रन्थप्रकाशनम्।

आचार्यः, वरदः (सन् २००४). *तत्त्वमुक्ताकलापसर्वंकषाव्याख्या* (मूलयुता). मैसूर : आर्षग्रन्थप्रकाशनम्।

आचार्यः, उदयनः (२०१३). *न्यायकुसुमाञ्जलिः*. वाराणसी : विद्याविलास।

वात्स्यायनः (सन् १९९८). *न्यायभाष्यम्* (प्रसन्नपदाव्याख्यायुतम्). वाराणसी : बौद्धभारती।

उद्योतकरः, भारद्वाजः (सन् १९९७). *न्यायभाष्यवर्तिकम्*. दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद्।

पञ्चाननः, विश्वनाथः (२०५२). *न्यायसिद्धान्तमुक्तावली*. वाराणसी : चौखम्बाविद्याभवन।

मिश्रः, वाचस्पतिः (सन् १९९०). *न्यायवार्तिकतात्पर्यटीका*. वाराणसी : चौखम्बासंस्कृतसंस्थान।

मिश्रः, सच्चिदानन्दः (सन् २००४). *ईश्वरपर्यालोचनम्*. दिल्ली : भारतीय विद्या प्रकाशन।

भट्टः, जयन्तः (सन् १९८२). *न्यायमञ्जरी* (ग्रन्थभंगीव्याख्यायुता). वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः।

श्रीनिवासः (सन् १९५०). *न्यायसिद्धान्तत्त्वामृतम्* : मद्रास।

भट्टः, महादेवः (सन् २००२). *दिनकरी* (मूलयुता). देहली : राष्ट्रिय संस्कृत संस्थान।